# संस्कृत (संस्कृतम्)

## प्रथम प्रश्न पत्र : (भारतीय धर्म दर्शन च)

**समयावधि : घण्टात्रयम्** **पूर्णाङ्का : 100**

1. निम्नाङ्कितेषु कयोशिचद् द्वयोः अप्रसङ्ग व्याख्या करणीया–

(क) तत्र गन्धवती पृथ्वी। सा द्विविधा–नित्या अनित्या च। नित्या परमाणुरूपा। अनित्या कार्यरूपा। पुनस्त्रिविद्याशरीरेन्द्रियविषय भेदात्।

(ख) शब्दगुणकमाकाशम्। तच्चैकं विभु नित्यं च।

(ग) असाधारणं कारणं करणम्। कार्यनियतपूर्ववृति कारणम्। कार्य प्रागभावप्रतियोगि।

(घ) यथा काष्ठमयो हस्ती यथा चर्ममयो मृगः।
यश्चविप्रोऽनधीयानस्त्रयस्ते नाम बिभ्रति।।

2. अधोलिखितेषु केषाच्चन् पच्चप्रश्नानाम् उत्तराणि संस्कृतमाध्यमेन देयानि –

(क) के सप्तपदार्थाः?

(ख) वायोः लक्षणं किम्?

(ग) रसः कतिविधिः? नामानि लिखन्तु।

(घ) अभावः कतिविधः? नामानि लिखन्तु

(ङ) जलस्य किं लक्षणम्? कति च भेदाः?

(च) कालस्य किं लक्षणम्, स कतिविधः?

(छ) स्पर्शस्य किं लक्षणम् तस्य च कतिभेदाः?

(ज) कः सन्निकर्षः कतिविधः च सः?

(झ) धर्माधर्मयोः किं लक्षणम्?

(ञ) व्याप्तिः का?

3. अधोलिखितयोः ससन्दर्भव्याख्या करणीया–

(क) न त्वेवाहं जातु नासं न त्वं नेमे जनाधिपाः।
न चैवं न भविष्यामः सर्वे वयमतः परम्।।

questionpaperesult.com

Scanned by CamScanner

अथवा

नैनं छिन्दन्ति शस्त्राणि नैनं दहति पावकः।
न चैनं क्लेदयन्त्यापों न शोषयति मारूतः।।

(ख) यावानर्थ उदपाने सर्वतः संप्लुतोदके।
तावान्सर्वेषु वेदेषु ब्राह्मणस्य विजानतः।।

अथवा

या निशा सर्वभूतानां तस्यां जागर्ति संयमी।
यस्यां जाग्रति भूतानि सा निशा पश्यतों मुनेः।।

4. अधोलिखितेषु केषाञ्चन् पञ्चप्रश्नानामुत्तराणि संस्कृतमाध्यमेन देयानि–

(क) क्रोधात् किं भवति?
(ख) कः अमृतत्वाय कल्पते?
(ग) श्रीमद्भगवाद्गीता कस्य काव्यस्य अंशः?
(घ) कः शन्तिमधिगच्छति?
(ङ) जातस्य मृतस्य च किं ध्रुवम्?
(च) संभावितस्य का मरणाद् अतिरिच्यते?
(छ) समत्वं किम्?
(ज) कस्य प्रज्ञा प्रतिष्ठिता भवति?
(झ) योगः कः?
(ञ) कस्य बुद्धिः आशु पर्यवतिष्ठते?

5. अधोलिखितेषु सूत्रेषु व्यासभाष्यमाधृत्य सूत्रद्वयस्य व्याख्या कार्या–

(क) योगश्चितवतिनिरोधः।
(ख) वृत्तयः पञ्चतप्यः क्लिश्टाऽक्लिष्टाः।
(ग) अनुभूतविषयासम्प्रमोषः स्मृतिः।
(घ) ईश्वरप्रणिधानाद्वा।
(ङ) तस्यापि निरोधे सर्वनिरोधानिर्न्बीजः समाधिः।

6. अधोलिखितेषु पच्चप्रश्नानामुत्तराणि देयानि–

(क) योगस्य किं लक्षणम्?
(ख) किं वैराग्यम्?
(ग) समृतिः का कथ्यते?
(घ) सवितर्का समापतिः का कथ्यते?
(ङ) असम्प्रज्ञातसमाधिः का कथ्यते?
(च) ईश्वरप्रणिधानाद् किं भवति?
(छ) ऋतम्भरा प्रज्ञा का कथ्यते?
(ज) प्रणवः कस्य वाचक?
(झ) कानि प्रमाणनि?
(ञ) अभ्यासः कः कथ्यते?

7. अधोलिखितेषु त्रयाणं श्लोकनां सप्रसग व्याख्या करणीया–

(क) वेदः स्मृति सदाचारः स्वस्य च प्रियमात्मनः।

questionpaperesult.com

Scanned by CamScanner

एतच्चतुर्विधं प्राहु साक्षाद्धर्मस्य लक्षणम्।।

(ख) कृष्णसारस्तु चरति मृगो यत्र स्वभावत:।
स ज्ञेयो यज्ञियो देशो म्लेच्छदेशस्त्ततव:परम्।।

(ग) अत: ऊर्ध्व त्रयोऽप्येते यथाकालमसंस्कृता:।
सावित्रीपतिता व्रात्या भवन्त्यार्यविगर्हिता:।।

(घ) यथा काष्ठमयो हस्ती यथा चर्ममयो मृग:।
यश्चविप्रोऽनधीयानस्त्रयस्ते नाम विभ्रति।।

(ङ) गुरोर्यत्र परीवादो निन्दा वापि प्रवर्तते।
कर्णो तत्र पिधातव्यौ गन्तव्यं वा ततोऽन्यत:।।

(च) क्षेत्र हिरण्यं गामश्वं क्षत्रोपानहमासनम्।
धान्यं शाकं च वासांसि गुरवे प्रीतिमाहवेत्।।

8. अधोलिखितानां केषाञ्चन् पञ्चप्रश्नानामुत्तराणि देयानि–

(क) मनुस्मृति: कस्य रचना अस्ति?

(ख) आचार्य: क: उच्यते?

(ग) मनुस्मृतौ कति अध्याया: सन्ति?

(घ) के संकल्पजा: स्मृता:?

(ङ) ब्राह्मणस्य उपनयनं कस्मिन् वर्षे कुर्यात्?

(च) इयं तनु: कै: ब्राह्मी क्रियते?

(छ) देवा: कं स्थविरं विदु:?

(ज) अस्मिन् लोके क: विनश्यति?

(ज) के त्रय: लोका: ?

(ज) विपश्चित: कुत्र न प्रमाधन्ति ?

questionpaperesult.com

Scanned by CamScanner